# Markandeyakritam 1 Vishnu Stotram

# मार्कण्डेयकृतं १ विष्णुस्तोत्रम्

## Document Information

Text title : Markandeyakritam 1 Vishnu Stotram

File name : mArkaNDeyakRRitaM1viShNustotram.itx

Category : vishhnu, vishnu, bRRihannAradIyapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 5/36-44||

Latest update : October 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 26, 2024

*sanskritdocuments.org*

# मार्कण्डेयकृतं १ विष्णुस्तोत्रम्

मार्कण्डेय उवाच ।
सहस्रशिरसं देवं नारायणमनामयम् ।
वासुदेवमनाधारं प्रणतोऽस्मि जनार्दनम् ॥ ३६॥

अमेऽयमजरं नित्यं सदानन्दैकविग्रहम् ।
अप्रतर्क्यमनिर्देश्यं प्रणतोऽस्मि जनार्दनम् ॥ ३७॥

अक्षरं परमं नित्यं विश्वाक्षं विश्वसम्भवम् ।
सर्वतत्त्वमयं शान्तं प्रणतोऽस्मि जनार्दनम् ॥ ३८॥

पुराणं पुरुषं सिद्धं सर्वज्ञानैकभाजनम् ।
परात्परतरं रूपं प्रणतोऽस्मि जनार्दनम् ॥ ३९॥

परं ज्योतिः परं धाम पवित्रं परमं पदम् ।
सर्वैकरूपं परमं प्रणतोऽस्मि जनार्दनम् ॥ ४०॥

तं सदानन्दचिन्मात्रं पराणां परमं पदम् ।
सर्वं सनातनं श्रेष्ठं प्रणतोऽस्मि जनार्दनम् ॥ ४१॥

सगुणं निर्गुणं शान्तं मायाऽतीतं सुमायिनम् ।
अरूपं बहुरूपं तं प्रणतोऽस्मि जनार्दनम् ॥ ४२॥

यत्र तद्भगवान् विश्वं सृजत्यवति हन्ति च ।
तमादिदेवमीशानं प्रणतोऽस्मि जनार्दनम् ॥ ४३॥

परेश परमानन्द शरणागतवत्सल ।
त्राहि मां करुणासिन्धो मनोऽतीत नमोऽस्तु ते ॥ ४४॥

इति नारदपुराणे पूर्वभागे पञ्चमाध्यायान्तर्गतं
मार्कण्डेयकृतं विष्णुस्तोत्रं समाप्तम् ।

बृहन्नारदीयपुराण । पूर्वभाग । अध्याय ५/३६-४४॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 5/36-44..

Proofread by PSA Easwaran

*Markandeyakritam 1 Vishnu Stotram*
pdf was typeset on October 26, 2024

Please send corrections to *sanskrit@cheerful.com*